# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा - अक्टूबर - 2019

| | | |
|---|---|---|
| **कक्षा-आचार्य(SEM-१) (New)** | **प्रश्नपत्रम् – 3** | गुणाः –70 |
| विषयः – नव्यव्याकरणम् | **कोड –C.C.4.1.2** | समयः- 8 तः 11 पर्यन्तम् |

दिनाङ्कः –11/10/2019 सन्दर्भग्रन्थः – प्रौढमनोरमा (पञ्चसन्धिप्रकरणम्)

---

**प्र. क्र.** **प्रथमान्वितिः (Unit 1)** **गुणाः**

**प्रश्न १ कस्याप्येकस्य उत्तरं देयम्।** ५

१ 'हल्' सूत्रे हकारोपदेशस्य प्रयोजनं सोदाहरणं लेखनीयम्?

२ 'आदिरन्त्येन सहेता' सूत्रस्य यथाग्रन्थं व्याख्या कार्या ।

**प्रश्न २ कस्यचिदेकस्य प्रश्नस्य उत्तरं देयम्।** १०

१ उपदेश-शब्दः भावघञन्तः करणघञन्तो वा? स्वाधीतग्रन्थदिशा विवेचनीय: ।

२ 'तुल्यास्यप्रयत्नं सवर्णम्' सूत्रस्य यथाग्रन्थं व्याख्या कार्या।

**द्वितीयान्वितिः (Unit 2)**

**प्रश्न ३ निम्नलिखितयोरेकस्य सूत्रस्य प्रौढमनोरमानुसारं व्याख्या कार्या।** ५

१ मिदचोऽन्त्यात्परः

२ हलो यमां यमि लोपः

**प्रश्न ४ कस्यचिदेकस्य प्रश्नस्योत्तरं लेख्यम्।** १०

१ 'इको गुणवृद्धी' सूत्रस्य प्रौढमनोरमानुसारं व्याख्या कार्या।

२ 'इको यणचि' सूत्रस्य यथाग्रन्थं व्याख्या कार्या।

**तृतीयान्वितिः (Unit 3)**

**प्रश्न ५ निम्नलिखितयोरेकस्य स्वपाठ्यपुस्तकानुसारं व्याख्या कार्या।** ५

१ प्रत्यये भाषायां नित्यम्।

२ उदः स्थास्तम्भोः पूर्वस्य।

**प्रश्न ६ कस्यचिदेकस्य प्रश्नस्य उत्तरं लेख्यम्।** १०

१ 'स्तोः श्चुना श्चुः' सूत्रस्य प्रौढमनोरमानुसारं व्याख्या कार्या।

२ 'शि तुक्' सूत्रस्य यथाग्रन्थं व्याख्या कार्या।

## चतुर्थान्वितिः (Unit 4)

**प्रश्न ७ निम्नलिखितयोरेकस्य स्वपाठ्यपुस्तकानुसारं व्याख्या कार्या।** ५

१ शर्परे विसर्जनीयः

२ हलि सर्वेषाम्

**प्रश्न ८ कस्यचिदेकस्य प्रश्नस्य उत्तरं लेख्यम्।** १०

१ 'इदुदुपधस्य चाप्रत्ययस्य' सूत्रस्य प्रौढमनोरमानुसारं व्याख्या कार्या।

२ 'ससजुषो रुः' सूत्रस्य यथाग्रन्थं व्याख्या कार्या।

**प्रश्न ९ दशप्रश्नानामतिलघूत्तराणि लिखत।** १०

१ प्रौढमनोरमायाः लेखकः कः?

२ रुदिहि इत्यत्र केन सूत्रेण इडागमो भवति?

३ श्रीमद्भट्टोजिदीक्षितमते उपदेश-शब्दे कस्मिन् अर्थे घञ्-प्रत्यये विद्यते?

४ 'प्रतिज्ञायते इति प्रतिज्ञा' इत्यत्र कस्मिन् अर्थे अङ्-प्रत्ययो विद्यते?

५ 'चेता' कस्य आन्तर्यस्य उदाहरणं विद्यते?

६ 'परान्नित्यं बलवद् भवति' इत्यस्य किम् उदाहरणं विद्यते?

७ 'अल्विधौ' इत्यत्र कतिविधः समासो भवति?

८ 'अलि विधिः' इत्यस्य किम् उदाहरणम्?

९ 'स्तोः' इत्यत्र कः समासः?

१० 'आक्रंस्यते' इत्यत्र केन सूत्रेण आत्मनेपदस्य विधानं भवति?

११ 'शि तुक्' सूत्रेण कस्य तुक् आगमो भवति?

१२ कानः नकारस्य स्थाने रु-आदेशः केन सूत्रेण भवति?

१३ ‘पयस्पाशम्’ कस्य उदाहरणम् अस्ति?

१४ ‘द्विस्त्रिश्चतुरिति कृत्वोऽर्थे’ सूत्रेण विसर्गस्य स्थाने कः आदेशो भवति?

१५ ‘ओतो गार्ग्यस्य’ सूत्रे गार्ग्यग्रहणं किमर्थं विद्यते?